## तयोरेव कृत्यक्तखलर्थाः। (७०/२८३३)

तयोरेव [1]भावकर्मणोः कृत्यसञ्ज्ञकाः [2]क्तखलर्थाश्च प्रत्यया भवन्ति। एवकारः कर्तुरपकर्षणार्थः। कृत्याः कर्मणि – कर्तव्यः कटो भवता। [3]भोक्तव्य ओदनो भवता। भावे – आशितव्यं भवता। शयितव्यं भवता। क्तः कर्मणि – कृतः कटो भवता। भुक्त ओदनो भवता। भावे – आसितं भवता। शयितं भवता। खलर्थाः कर्मणि – ईषत्करः कटो भवता। सुकरः। दुष्करः। भावे – ईषदाढ्यंभवं भवता। [4]स्वाढ्यंभवं भवता। भावे चाकर्मकेभ्यः (३. ४. ६९/२१५१) [5]इत्यनुवृत्तेः सकर्मकेभ्यो भावे न भवन्ति॥

## आदिकर्मणि क्तः कर्तरि च। (७१/३०५३)

आदिकर्मणि यः क्तो [6]विहितः स कर्तरि भवति। चकाराद् यथाप्राप्तं भावकर्मणोः[7]। आदिभूतः क्रियाक्षण आदिकर्म, तस्मिन्नादिकर्मणि भूतत्वेन विवक्षिते यः क्तो विहितः, तस्यायमर्थनिर्देशः। प्रकृतः कटं देवदत्तः, प्रकृतः कटो देवदत्तेन, प्रकृतं देवदत्तेन। प्रभुक्त ओदनं देवदत्तः, [8]प्रभुक्त ओदनो देवदत्तेन, प्रभुक्तं देवदत्तेन॥

## गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। (७२/३०८६)

गत्यर्थेभ्यो धातुभ्योऽकर्मकेभ्यः श्लिषादिभ्यश्च यः क्तः, [9]स कर्तरि भवति। चकाराद् यथाप्राप्तं च भावकर्मणोः। [10]गतो देवदत्तो ग्रामम्, गतो देवदत्तेन ग्रामः, गतं देवदत्तेन। अकर्मकेभ्यः – ग्लानो भवान्, ग्लानं भवता। आसितो भवान्, आसितं भवता। [11]श्लिष – उपश्लिष्टो गुरुं भवान्, [12]उपश्लिष्टो गुरुर्भवता, उपश्लिष्टं भवता। शीङ् – उपशयितो गुरुं भवान्, उपशयितो गुरुर्भवता, उपशयितं भवता। स्था – [13]उपस्थितो गुरुं भवान्, उपस्थितो गुरुर्भवता, उपस्थितं भवता। आस — उपासितो गुरुं भवान्, उपासितो गुरुर्भवता, उपासितं भवता। वस – अनूषितो गुरुं भवान्, अनूषितो गुरुर्भवता, अनूषितं भवता। जन – अनुजातो माणवको माणविकाम्, अनुजाता माणवकेन माणविका, अनुजातं माणवकेन। रुह – आरूढो वृक्षं भवान्, आरूढो वृक्षो भवता, [14]आरूढं भवता। जीर्यति – अनुजीर्णो वृषलीं देवदत्तः, अनुजीर्णा वृपली देवदत्तेन, अनुजीर्णं देवदत्तेन[15]। श्लिषादयः सोपसर्गाः सकर्मका भवन्ति,[16] तदर्थमेषामुपादानम्[17]॥

## दाशगोघ्नौ सम्प्रदाने। (७३/३१७२)

दाशगोघ्नौ शब्दौ संप्रदाने कारके निपात्येते। 'दाशृ दाने' (धा. पा. ८८३), ततः पचाद्यच्। स [18]कृत्सञ्ज्ञकत्वात् कर्तरि प्राप्तः, [19]सम्प्रदाने निपात्यते। दाशन्ति तस्मै इति दाशः। आगताय तस्मै दातुं गां [20]हन्ति इति गोघ्नः, अर्घार्होऽतिथिः। [21]टगत्र निपात्यते। निपातनसामर्थ्यादेव [22]गोघ्नः [23]ऋत्विगादिरुच्यते, न तु[24] चण्डालादिः। असत्यपि च गोहनने [25]तस्य योग्यतया गोघ्नः इत्यभिधीयते॥

---

1. कर्मणोः ब. 2. क्तश्च खलर्थाश्च ब. 3. उदाहरणमिदं नास्ति ब. फ. 4. दुराढ्यं भवता ब. क. 5. इत्यनुवर्तते तेन ब. क. ग. 6. विहितः नास्ति अ. फ. ब. 7. च इत्यधिकम् ग. 8. एते उदाहरणे न स्तः फ. 9. सः नास्ति ह. 10. गत्यर्थेभ्यः इत्यधिकम् अ. 11. श्लिष नास्ति फ. 12. अनुश्लिष्टो फ. 13. उपस्थितो–उपासितं भवता नास्ति फ. 14. आरूढं नास्ति फ. ह. 15. इत्यादि च भवति इत्यधिकम् फ. 16. इति इत्यधिकम् क. 17. अकर्मकविवक्षायां सर्वेषां भावे क्तः भवति इत्यधिकम् क. 18. कृत्त्वात् अ. ब. ह. 19. संप्रदानकारके फ. 20. घ्नन्ति अ.ब. 21. टगत्र नास्ति क. फ. ह. 22. च अर्घार्हः अ. ब. ह. 23. ऋत्विगादयः उच्यन्ते ब. 24. तु नास्ति फ, चण्डालादयः ब. 25. तस्य तद्योग्यतया ब. ह.